पिञ्जनं, क्ली, ( पिञ्ज्यतेऽनेनेति । पिजि स्फोटने + करणे ल्युट् ।) कार्पासस्फोटनधनुः । तत्पर्य्यायः । विहननम् २ तूलस्फोटनकार्मुकम् ३ । इति हेमचन्द्रः । ३ । ५७६ ॥

पिञ्जरं, क्ली, ( पिजि दीप्तौ वर्णे वा + बाहुलकात् अरः । इत्युज्ज्वलदत्तः । ३ । १३१ । ) हरितालम् । इत्यमरः । २ । ६ । १०३ ॥ स्वर्णम् । इति मेदिनी । रे, १८५ ॥ नागकेशरम् । इति राजनिर्घण्टः ॥ पश्वादिबन्धनगृहम् । कायास्थि इन्दम् । इत्यमरटीकायां रामाश्रमः ॥

पिञ्जरः, पुं, ( पिजि + अरः । ) अश्वभेदः । पीतरक्तवर्णः । इति हेमचन्द्रः ॥ ( सुमेरुपश्चिमपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५।६।
"पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः ॥")
पीते, त्रि । इति मेदिनी । रे, ११५ ॥ ( यथा, आर्य्यासप्तशत्याम् । ३६९ ।
"प्रियया कुङ्कुमपिञ्जरपाणिद्वययोजनाङ्कितं वासः ।
प्रहितं मां याच्ञाञ्जलिसहस्रकिरणाय शिक्षयति ॥" )

पिञ्जरकं, क्ली, ( पिञ्जरमेव । स्वार्थे कन् । ) हरितालम् । इति राजनिर्घण्टः ॥ ( पुं, नागविशेषः । यथा, महाभारते । १ । ३५ । ६ ।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥")

पिञ्जलं, क्ली, ( पिजि हिंसायां वर्णे च + कलच् ।) कुशपत्रम् । हरितालम् । इति धरणिः ॥

पिञ्जलः, पुं, (पिजि + कलच् । ) अत्यन्तव्याकुलसैन्यादिः । इत्यमरः । २ । ८ । ६६ ॥

पिञ्जली, स्त्री, ( पिञ्जल + स्त्रियां ङीष् । ) कुशान्तरवेष्टितप्रादेशमात्रसाग्रकुशपत्रद्वयम् । अस्या नामान्तरं पवित्रम् । यथा,—
"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् ॥"
इति छन्दोगपरिशिष्टम् ॥

पिञ्जा, स्त्री, ( पिञ्ज्यते स्फोट्यते इति । पिञ्ज + गुरोश्चेत्यः । ततष्टाप् । ) तूलम् । हरिद्रा । इति त्रिकाण्डशेषः ॥ छड़ी । छड़ा इति भाषा ॥ यथा, शब्दमालायाम् ।
"प्रोत्फलः सिंहला स्यानच्छड़ी पिञ्जा छटापि च ॥"

पिञ्जानं, क्ली, स्वर्णम् । इति राजनिर्घण्टः ॥

पिञ्जिका, स्त्री, ( पिञ्जयतीति । पिजि + ण्वुल् । टापि अत इत्वम् । ) तूलनालिका । इति त्रिकाण्डशेषः ॥ पाँइज इति भाषा ॥

पिञ्जूलं, क्ली, ( पिञ्जयतीति । पिजि + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणां ४ । ६० । इति ऊलच् । ) वर्त्तिका । इत्युणादिकोषः ॥

पिञ्जूषः, पुं, (पिञ्जयति छिनत्ति कर्णौ इति । पिजि + बाहुलकात् ऊषन् । ) कर्णमलम् । इति हेमचन्द्रः । २ । २६६ ॥

पिञ्जेटः, पुं, ( पिञ्जटः । पृषोदरादित्वात् साधुः । ) नेत्रमलम् । इति शब्दरत्नावली ॥

पिञ्जोला, स्त्री, (पिञ्जयतीति । पिजि + बाहुलकात् ओलः । ) पत्रकाहला । पत्रशब्दः । इति हारावली । २०७ ॥

पिट, संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं सकं-अकंच-सेट् । ) पेटति जनः किञ्चिद्राशीकरोति शब्दायते वा । इति दुर्गादासः ॥

पिटं, क्ली, ( पेटति संहतो भवतीति । पिट + कः । ) चालः । इति त्रिकाण्डशेषः ॥

पिटः, पुं, ( पेटति द्रव्यान्तरैः संहतो भवतीति । पिट संहतौ + कः । ) पेटः । इति धरणिः ॥ पेटारा इति भाषा ॥

पिटकः, पुं, क्ली, ( पेटतीति । पिट् + क्वुन् ।) वंशवेत्रादिमयसमुद्गकः । पेटारी इति पेटा इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पेटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ स्वल्पपेटिकायाम् । इति स्वामी ॥ पेटः ५ पेटिका ६ तरिः ७ तरी ८ मञ्जुषा ९ पेड़िका १० । इति शब्दरत्नावली ॥ ( यथा, मार्कण्डेये । ५० । ८६ ।
"कुद्दालदात्रपिटकास्तद्वत् स्थाल्यादिभाजनम् ॥" )
विस्फोटे, त्रि । इति मेदिनी । के, १२० ॥ (देहेस्थानभेदेन जातस्यास्य शुभाशुभसूचकम् । यथा, वृहत्संहितायाम् । ५२ । १—१० ।
"सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये ।
ते क्रमशः प्रोक्तफला वर्णानामग्रजादीनाम् ॥
सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्द्धि सौभाग्यमाराद्
दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलताञ्च ।
तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
शङ्ख्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगाश्चाति चिन्ताम् ॥
घ्राणागण्डे वसनसुतदाश्चौष्ठयोरन्नलाभं
कुर्य्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे ।
हन्वोरेवं गलकृतपदा भूषणान्यन्नपाने
श्रोत्रे तद्भूषणगणमपि ज्ञानमात्मस्वरूपम् ॥
शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता
अयोघातं घातं सुततनयलाभं शुचमपि ।
प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्
विनाशं कक्षोत्था विदधति धनानां बहु सुखम् ॥
दुःखशत्रुनिचयस्य विघातं
पृष्ठबाहुयुगजा रचयन्ति ।
संयमञ्च मणिबन्धनजाता
भूषणादसुपबाहुयुगोत्थाः ॥
धनाप्तिं सौभाग्यं शुचमपि कराङ्गुल्युदरगाः
सुपानाम्नं नाभौ तदध इह चौरैर्धनहृतिम् ।
धनं धान्यं वस्तौ युवतिमथ मेढ्रे सुतनयान्
धनं सौभाग्यं वा गुदवृषणजाता विदधति ॥
ऊर्व्वोर्यानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम् ।
शस्त्रेण जङ्घयोर्गुल्फेऽध्वबन्धक्लेशदायिनः ॥
स्फिक्पार्ष्णिपादजाता
धननाशागम्यगमनमध्वानम् ।
बन्धनमङ्गुलिनिचये-
ऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम् ॥
उत्पातगण्डपिटका
दक्षिणतो वामतस्त्वभीघाताः ।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम् ॥
इति पिटकविभागः प्रोक्त आ मूर्द्धतोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः ।
भवति मशकलक्ष्मावर्त्तजन्मापि तद्व-
न्निगदितफलकारि प्राणिनां देहसंस्थम् ॥")

पिटङ्काशः, पुं, पर्व्वतोर्म्मिमत्स्यः । इति भूरिप्रयोगः ॥

पिटङ्कोकी, स्त्री, इन्द्रवारुणी । इति रत्नमाला ॥

पिटाकः, पुं, मुनिविशेषः । इत्युणादिकोषः ॥

पिट्टकं, क्ली, ( किट्टकं पृषोदरादित्वात् कस्य पः ।) दन्तकिट्टकम् । इति शब्दरत्नावली ॥

पिठ, क्लिशि । वधे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-वधे सकं-सेट् । ) ओष्ठ्यवर्गाद्यादिः । पेठति । पिपिठतुः । क्लिशि दुःखानुभवे । इति दुर्गादासः ॥

पिठरं, क्ली, (पिठं रातीति । रा + कः ।) मुस्ता । मन्थानदण्डः । इति मेदिनी । रे, १८४ ॥

पिठरः पुं, ( पिठ्यते क्लिश्यतेऽनेनेति । पिठ + करन् । ) गृहभेदः ॥ तत्पर्य्यायः । कुदङ्कः २ उद्घाटः ३ । इति त्रिकाण्डशेषः ॥ ( यथा, आर्य्यासप्तशत्याम् । ५५२ ।
"विद्युज्ज्वालावलयितजलधरपिठरोदराद्विनिर्यान्ति ॥")
स्थाली । इत्यमरः । २ । ६ । ३१ ॥ ( यथा, महाभारते । ३ । ३ । ७२ ।
"गृह्णीष्व पिठरं ताम्रं मया दत्तं नराधिप ! ।
यावत् वर्त्स्यति पाञ्चाली पात्रेणानेन सुव्रत ! ॥"
अग्निविशेषः । यथा, हरिवंशे । १७८ । ३३ ।
"पिठरः पतगः स्वर्णस्वागाधो भ्राज एव च ।
स्वधाकाराश्रयाः पञ्च अयुध्यंस्तेऽपि चाग्नयः ॥"
दानवविशेषः । यथा, महाभारते । २। ६। १३।
"घटोदरो महापार्श्वः क्रथनः पिठरस्तथा ॥")

पिठरी, स्त्री, (पिठर + स्त्रियां ङीष् ।) स्थाली । इत्यमरटीकायां रायमुकुटः ॥

पिड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । ) इ क, पिण्डयति । संहतिः राशीकरणम् । इति दुर्गादासः ॥

पिड, इ ङ संहतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-अकं-सेट् । सकं इति केचित् । ) इ, पिण्ड्यते । ङ, पिण्डते । इति दुर्गादासः ॥

पिड़कः पुं, ( पीड़यतीति । पीड़ + ण्वुल् । निपातनात् साधुः ।) स्फोटकः । इति हेमचन्द्रः । ३ । १३० ॥